तन्तुपर्व्व, [न्] क्ली, (तन्तुः पवित्रमिति तत्प्रदानाय यत् पर्व्व विधिविशेषः ।) परमेश्वरोपवीतिदानतिथिः । सा श्रावणी पूर्णिमा । इति तिथ्यादितत्त्वम् ॥

तन्तुनागः, पुं, (तन्तुर्नाग इव ।) ग्राहः । इति हेमचन्द्रः ॥

तन्तुनिर्य्यासः, पुं, (तन्तुरेव निर्य्यासः तन्तुवत् निर्य्यासो यस्य वा ।) तालः । इति शब्दरत्नावली ॥

तन्तुभः, पुं, (तन्तुरिव भातीति । भा + कः ।) सर्षपः । इत्यमरः । २।६।१७ ॥ वत्सः । इति जटाधरः ॥

तन्तुरं, क्ली, (तन्तुरस्त्यस्येति । तन्तु + अश्मादित्वात् रः ।) मृणालम् । इति शब्दरत्नावली ॥

तन्तुलं, क्ली, (तन्तुरम् । रस्य लत्वम् ।) मृणालम् । इति हेमचन्द्रः ॥

तन्तुवापः, पुं, (तन्तून् वपतीति । वप + "कर्म्मण्यण् ।" ३ । २ । १ । इति अण् ।) तन्त्रवायः । इति जटाधरः ॥ ताँति इति भाषा ॥ तन्त्रम् । इति शब्दमाला ॥ ताँत् इति भाषा ॥

तन्तुवायः, पुं, (तन्तून् वयति विस्तारयति जालाकारेणेति । वे + "संज्ञायाञ्च ।" ६ । २ । ७७ । इत्यण् ।) लूता । इत्यमरः । २।६।१३ ॥ (तन्तून् वयतीति । वे + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) तन्त्रवायः । इति शब्दरत्नावली ॥ (यथा, मनुः । ८ । ३९७ ।
"तन्तुवायो दशपलं दद्यादेकपलाधिकम् ॥")

तन्तुविग्रहा, स्त्री, (विगृह्यतेऽसौ । वि + ग्रह + अप् । विग्रहो देहः । तन्तुभिर्निर्म्मितो विग्रहोऽस्याः ।) कदली । इति त्रिकाण्डशेषः ॥

तन्तुशाला, स्त्री, (तन्तुवपनार्थं या शाला गृहमित्यर्थः ।) तन्तुवपनगृहम् । ताँतघर इति भाषा । तत्पर्य्यायः । गर्त्तिका २ । इति हेमचन्द्रः ॥

तन्तुसन्ततं, त्रि, (तन्तुना तन्तुभिर्व्वा सन्ततं व्याप्तम् ।) सूत्रविस्तृतवस्त्रादि । सिङ्गाय कापड़ इति भाषा । तत्पर्य्यायः । ऊतम् २ स्यूतम् ३ उतम् ४ । इत्यमरः । ३ । १ । १०१ ॥

तन्तुसारः, पुं, (तन्तुः एव सारो यत्र ।) गुवाकवृक्षः । इति त्रिकाण्डशेषः ॥

तन्त्रं, क्ली, (तनोति तन्यते इति वा । तन + कर्म्मादौ यथायथं ष्ट्रन् । तत्रि कुटुम्बधारणे + घञ् वा ।) कुटुम्बकृत्यम् । (कुलप्रतिष्ठादिकस्थितिः । यथा, महाभारते ।१२।४८।६ ।
"सर्व्वानुपायानथ सम्प्रधाय
समुद्धरेत् स्वस्य कुलस्य तन्त्रम् ॥")
सिद्धान्तः । औषधिः । प्रधानम् । तन्तुवायः । परिच्छदः । श्रुतिशाखाविशेषः । हेतुः । उभयार्थप्रयोजकम् । इतिकर्त्तव्यता । इति मेदिनी ॥ राष्ट्रम् । परच्छन्दः । करणम् । अर्थबाधकः । तन्तुः । सैन्यम् । स्वराष्ट्रचिन्ता । इति हेमचन्द्रः ॥ (यथा, माघे । २ । ८८ ।
"तन्त्रावापविदा योगैर्मण्डलान्यधितिष्ठता ॥")
प्रबन्धः । इति शब्दरत्नावली ॥ शपथः । इति धरणिः ॥ धनम् । गृहम् । वयनसाधनम् । (यथा, महाभारते । १।३।१४० । "तदापश्यत् स्त्रियौ तन्त्रे अधिरोप्य सुवेमे पटं वयन्त्यौ ॥") कुलम् । इति नानार्थध्वनिमञ्जरी । (शास्त्रम् । इति विश्वः । यथा, देवीभागवते ।२।११।१६ ।
"सर्व्वैर्मन्त्रसमत्कृतं वालदैत्यासमन्वितम् ॥"
व्यवहारः । नियमादिः । यथा, महाभारते । १ । १०३ । २६ ।
"मुक्त्वा त्वं प्रतिपद्यस्व प्राज्ञैः सह पुरोहितैः ।
आपद्धर्म्मार्थकुशलैर्लोकतन्त्रमवेक्ष्य च ॥")
शिवोक्तशास्त्रम् । तच्च चतुःषष्टिसंख्यकम् । यथा,—
"सिद्धीश्वरं महातन्त्रं कालीतन्त्रं कुलार्णवम् ।
ज्ञानार्णवं नीलतन्त्रं फेत्कारीतन्त्रमुत्तमम् ॥
देव्यागमं उत्तराख्यं श्रीक्रमं सिद्धियामलम् ।
मत्स्यसूक्तं सिद्धसारं सिद्धिसारस्वतं तथा ॥
वाराहीतन्त्रं देवेशि ! योगिनीतन्त्रमुत्तमम् ।
गणेशविमर्षिणी तन्त्रं नित्यातन्त्रं शिवागमम् ॥
चामुण्डाख्यं महेशानि ! मुण्डमालाख्यतन्त्रकम् ।
हंसमाहेश्वरं तन्त्रं निरुत्तरमनुत्तमम् ॥
कुलप्रकाशकं देवि ! कल्पं गान्धर्व्वकं शिवे ! ।
क्रियासारं निबन्धाख्यं स्वतन्त्रं तन्त्रमुत्तमम् ॥
सम्मोहनं तन्त्रराजं ललिताख्यं तथा शिवे ! ।
राधाख्यं मालिनीतन्त्रं रुद्रयामलमुत्तमम् ॥
बृहत्श्रीक्रमं तन्त्रं गवाक्षं सुकुमुदिनी ।
विशुद्धेश्वरतन्त्रञ्च मालिनीविजयं तथा ॥
समयाचारतन्त्रञ्च भैरवीतन्त्रमुत्तमम् ।
योगिनीहृदयं तन्त्रं भैरवं परमेश्वरि ! ॥
सनत्कुमारकं तन्त्रं योनितन्त्रं प्रकीर्त्तितम् ।
तन्त्रान्तरञ्च देवेशि ! नवरत्नेश्वरं तथा ॥
कुलचूड़ामणितन्त्रं भावचूड़ामणीयकम् ।
तन्त्रदेवप्रकाशञ्च कामाख्यानामकं तथा ॥
कामधेनु कुमारी च भूतडामरसंज्ञकम् ।
मालिनीविजयं तन्त्रं यामलं ब्रह्मयामलम् ॥
विश्वसारं महातन्त्रं महाकालं कुलामृतम् ।
कुलोड्डीशं कुब्जिकाख्यं यन्त्रचिन्तामणीयकम् ॥
एतानि तन्त्ररत्नानि सफलानि युगे युगे ।
कालीविलासकादीनि तन्त्राणि परमेश्वरि ! ॥
कालकल्पे सुसिद्धानि अश्वक्रान्तासु भूमिषु ।
महाचीनादितन्त्राणि अविकल्पे महेश्वरि ! ॥
सुसिद्धानि वरारोहे ! रथक्रान्तासु भूमिषु ॥"
इति महासिद्धिसारस्वतम् ॥ * ॥
अपि च ।
"चतुःषष्टिश्च तन्त्राणि यामलादीनि पार्व्वति ! ।
सफलानीह वाराहि ! विष्णुक्रान्तासु भूमिषु ॥
कल्पभेदेन तन्त्राणि कथितानि च यानि च ।
पापमोहनायैव विफलानीह सुन्दरि ! ॥"
इति महाविश्वसारतन्त्रम् ॥
तत्रागमस्य लक्षणं यथा,—
"सृष्टिश्च प्रलयश्चैव देवतानां यथार्चनम् ।
साधनञ्चैव सर्व्वेषां पुरश्चरणमेव च ॥
षट्कर्म्मसाधनञ्चैव ध्यानयोगश्चतुर्व्विधः ।
सप्तभिर्लक्षणैर्युक्तमागमं तद्विदुर्बुधाः ॥" * ॥
यामलस्य लक्षणम् ।
"सृष्टिश्च ज्योतिषाख्यानं नित्यकृत्यप्रदीपनम् ।
क्रमसूत्रं वर्णभेदो जातिभेदस्तथैव च ॥
युगधर्म्मश्च संख्यातो यामलस्याष्टलक्षणम् ॥" * ॥
तन्त्रस्य लक्षणम् ।
"सर्गश्च प्रतिसर्गश्च मन्त्रनिर्णय एव च ।
देवतानाञ्च संस्थानं तीर्थानाञ्चैव वर्णनम् ॥
तथैवाश्रमधर्म्मश्च विप्रसंस्थानमेव च ।
संस्थानञ्चैव भूतानां यन्त्राणाञ्चैव निर्णयः ॥
उत्पत्तिर्विबुधानाञ्च तरूणां कल्पसंज्ञितम् ।
संस्थानं ज्योतिषाञ्चैव पुराणाख्यानमेव च ॥
कोषस्य कथनञ्चैव व्रतानां परिभाषणम् ।
शौचाशौचस्य चाख्यानं नरकाणाञ्च वर्णनम् ॥
हरचक्रस्य चाख्यानं स्त्रीपुंसोश्चैव लक्षणम् ।
राजधर्म्मो दानधर्म्मो युगधर्म्मस्तथैव च ॥
व्यवहारः कथ्यते च तथा चाध्यात्मवर्णनम् ॥
इत्यादिलक्षणैर्युक्तं तन्त्रमित्यभिधीयते ॥" * ॥
तस्य माहात्म्यम् ।
"विष्णुर्व्वरिष्ठो देवानां ह्रदानामुदधिस्तथा ।
नदीनाञ्च यथा गङ्गा पर्व्वतानां हिमालयः ॥
अश्वत्थः सर्व्ववृक्षाणां राज्ञामिन्द्रो यथा वरः ।
देवीनाञ्च यथा दुर्गा वर्णानां ब्राह्मणो यथा ॥
तथा समस्तशास्त्राणां तन्त्रशास्त्रमनुत्तमम् ॥
सर्व्वकामप्रदं पुण्यं तन्त्रं वै वेदसम्मितम् ।
कीर्त्तनं देवदेवस्य हरस्य मतमेव च ॥
पावनं श्रद्दधानानामिह लोके परत्र च ॥" * ॥
तस्य श्लोकसंख्या यथा,—
"न शक्यं विस्तराद्वक्तुमपि वर्षशतैरपि ।
संक्षेपाद्वै प्रवक्ष्यामि श्लोककल्पोक्तवर्त्मना ॥
दिवि देवे नवलक्षं पाताले ब्रह्मशासने ॥
लक्षमात्रं भारते च क्षितौ तन्त्राणि यानि च ।
आगमं त्रिविधं प्रोक्तं चतुर्थमैश्वरं स्मृतम् ॥
कल्पश्चतुर्व्विधः प्रोक्तः आगमो डामरस्तथा ।
यामलञ्च तथा तन्त्रं तेषां भेदाः पृथक् पृथक् ॥
मुक्तकाख्यं प्रपञ्चञ्च सारदाख्यञ्च नारद ! ।
महार्णवञ्च कपिलो योगः कल्पः कपिञ्जलः ॥
अमृतशुद्धिर्वीरञ्च सिद्धसंवरणस्तथा ।
प्रथमोऽष्टसहस्रन्तु श्लोका दश प्रकीर्त्तिताः ॥
द्वितीयो मुक्तकस्तत्र षट्सहस्राणि संख्यया ।
श्लोकाः शताद्धसंख्यातस्तृतीयस्त्रिसहस्रकः ॥
शतद्वयं साधिकञ्च श्लोकानां पञ्चविंशतिः ।
त्रिंशोत्तरसहस्राणि श्लोकानां भानुसंख्यया ॥
प्रपञ्चे प्रथमे तन्त्रे द्वितीये वसुसंख्यया ।
सहस्राणि तथा श्लोकाः सप्तविंशतिसंख्यया ॥
भूतनेत्रसहस्राणि तृतीये पञ्चसहस्रकम् ।
शतत्रयं षष्टिश्लोकाः प्रपञ्चः कथितस्त्रिधा ॥
कलासंख्या सहस्राणि शारदायाः प्रकीर्त्तिताः ।
पञ्चविंशाधिकाः श्लोका वसुश्लोकाश्च नारद ॥
विंशतिश्च सहस्राणि षट्सहस्राणि संख्यया ।
वसुश्लोकाश्च कथिताः कपिले श्लोकसंख्यया ॥
त्रयोदशसहस्राणि कालोत्तरशतत्रयम् ।